श्रीगणेशायनमः॥नमस्कृत्यगुरूत्सर्वान्निरूढंमणिदीधितौ॥श्रीभवानंदसिद्धांतवागीशेन
प्रकाश्यते॥१॥ॐनमइति।परमात्मने॰सर्वोत्कृष्टात्मनेनमः॥उत्कर्षश्चजगतः सृष्टिस्थितिप्रल
यकर्तृत्वं॥एकरूपस्यकथंसृष्ट्यादिविचित्रकार्यकारित्वंतत्रहेतुमाह॥ॐमितिब्रह्मविष्णुशि
वात्मकोयस्यर्थः॥ॐकारश्चठकेरकारोकारमकारैर्ब्रह्मादीनांप्रतिपादनात्॥तस्यचनमस्कार्य
तात्पर्यप्रयोजकंरूपांतरमपिदर्शयति।सर्वेति।सर्वेभूतानि॰सर्वप्राणिनः॥विष्॰व्याप्तौ॰अंतर्यामितया
स्वस्वकार्येनियोज्यपरितिष्ठतेसतइत्यर्थः॥अंतर्यामिणोभगवतःप्रेरणयैवसर्वप्राणिनांस्वस्व
कार्यप्रवृत्तिरितिभावः॥विष्लृंभश्चधारणात्मकः॥संयोगविशेषःभूतपदंमूर्त्तपरं।अतएवविश्व
व्यापीविश्वशक्तिःपिनाकीत्यत्रविश्वशब्दोयावन्मूर्त्तपरइत्याचार्याः॥प्रयत्नवदीश्वरसंयोगस्य

यत्रब्रह्मोद्दीपनप्रतिबंधकत्वात्॥अतएवधावाप्रथिवीविधृतेतिष्ठतइतिश्रुतिरपिभगवत्संयो
गस्यधारकत्वमाहेत्यपिवदंति।यत्तु।श्रीकांतेनेश्वरादतिरिच्यतेतिमतानुसारेणेदमिति॥तन्न
ईश्वरस्येवाकाशतयाभूतपदवाच्यत्वेनतत्रैवतस्यतिर्यक्संयोगाभावात्॥अखंडोनित्ये
आनंदबोधोयस्यतस्मइत्यर्थः॥नित्यंविज्ञानमानंदंब्रह्मेतिश्रुतिरपिब्रह्मस्वरूपावधारणपरा
आनंदविशिष्टस्यनित्यत्वंप्रतिपादयंतीविशेषस्योक्तानंदस्यनित्यत्वंप्रतिपादयति।यथाचश्रु
तिर्बलासिद्धानिसुखंसुखत्वावांतरजातिरकपुण्यजन्यतावच्छेदकत्वंनकल्प्यतइत्याशयः
अखंडोदुःखासंभिन्नआनंदोयस्मादेवंभूतोपरमात्मकोवाधोयस्यतिवार्थः।यस्यति
षष्ठ्यर्थोविषयातां।पूर्णायअप्रतिहतेच्छायननुसंगतिप्रदर्शनानुमाननिरूपणप्रतिज्ञायाः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रयोजनाभावः। संगताभिधानस्येवोन्मत्तप्रलपितत्वादिशंकानिरासप्रयोजनत्वादत आह। पू
र्वीपरेति। संगतिप्रदर्शनस्यफलंएकवाक्यताप्रतिपत्तिः॥ अनुमाननिरूपणाप्रतिज्ञायाःफ
लंशिष्यावधानमित्यर्थः। यस्यप्रयोजनवत्तामवगम्यपूर्वग्रंथेप्रवृत्तानांतदेकवाक्यता
ज्ञानेनैवोत्तरग्रंथेपितत्प्रयोजनवत्ताज्ञानेनप्रवृत्तिसंभवादितिभावः॥ तत्रचअर्थैक्या
देकंवाक्यंसकांक्षंचेद्विभागेस्यादितिजैमिनिसूत्रं। अत्रार्थैक्यादेतावन्मात्रकृतेभागावां
विभजहृषीवांविभजहृदित्यनयोर्विभागरूपार्थैक्यादितिव्याप्तिरतःसाकांक्षंचेदिति
विभागविच्छेदपरंश्रोतुंयदिपरस्परार्थान्वेषविषयिण्याकांक्षाभवति। यथाघटमा
नयत्यत्रघटमित्युक्तेआनयपश्यवत्याकांक्षाएवमानयेत्यावदुक्तेघटंपटंवेतिश्रा

तुराकांक्षाभागोपांविभजेत्यस्यविच्छेदपाठेतुनैवमाकांक्षेतितच्छ्रुतासः। तावन्मात्रेचस्यो
नंतसदनंऋणमित्यृतस्यधारयासुशेवंकल्पयामि॥ तस्मिन्सीदाम्यृतप्रतिष्ठाघृतवतीहो
णोमधुमन्नस्यमानइत्यत्रकल्पयामिइत्यंतःसदनार्थकएकोमंत्रः। तस्मिन्नित्यादिप
रःसादनार्थकः। एतयोश्चविभागेसाकांक्षत्वमस्तिकल्पयामीत्यंतस्यविच्छेदेतस्मिन्क
स्मिन्नित्याकांक्षासंभवात्। अतोऽर्थैक्यादिति। अत्रसदनसादनयोरर्थयोर्भेदादितिभा
वः। अर्थैक्यंचनवाक्यार्थैक्यंप्रतिप्रकरणंवाक्यार्थानांभूदात्। किंतुतात्पर्यविषयैक्यं।
प्रकृतेचप्रमाणान्तरविवेचनमेवचतुर्णांग्रंथानांतात्पर्यविषयःकारणंकथनानंतरं
कार्यस्याकथनेकिमस्यकार्यमित्याकांक्षावेति। नचविभिन्नतात्पर्यकेपिप्रसंगादिस

गतिमत्वात्तत्संगतिरिहैकवाक्यतान्याप्येतिकर्यंतयैकवाक्यताप्रतिपत्तिरितिवाच्यं।एकवाक्य
ताप्रतिपन्नयोरवसंगतियवाद्वारेणसंगतिलक्षणाप्येकवाक्यतायाअनुप्रवेशात्।विभिन्न
तात्पर्यकेसंगत्यभावादिति।अकारांतप्रत्यक्षपदस्यमूलेअसत्वात्प्रत्यक्षेतिपाठनिर्देशोऽनुचि
तइत्याशंक्यनाह।प्रत्यक्षवितीति।प्रत्यक्षप्रमीत्यनंतरंअनुमितिनिरूपणेप्रत्यक्षप्रमाणानंतरं
चानुमाननिरूपणेसंगतेराकांक्षितत्वात्।उभयत्रैवतत्प्रदर्शनेगौरवंमूलस्याह।अत्रोपजी
व्योपजीवकभावइति।अत्रप्रत्यक्षानुमानयोः।अतएवफलयोरादौनिरूपणात्फलतइतिप्र
थमुपन्यस्तंकेचित्तु।स्वरूपयोःफलयोश्चकार्यकारणभावोपिस्वरूपयोःसंगतिर्जिज्ञासा
पेक्षेत्यादिरित्याहुःउपजीवकत्वंसंगतिः।साचानंतराभिधानव्याप्या।अतएवोपजीवकत्व

स्यानंतरंनिरूप्यतइत्यक्तमितिप्राचीनानांमतमनुस्त्याह।प्रत्यक्षफलस्येति।अनुमित्यनुव्यवसा
यादित्यादिनाऽनुमित्यात्मकविशेषणतावच्छेदकप्रकारकधीमूलकविशिष्टवैशिष्ट्यप्रत्य
क्षपरिग्रहः।नसर्वेति।अयंघटइतिप्रत्यक्षेव्यभिचारादित्यर्थः।तथाअनुमित्युपजीविकानां
नुयत्रानीद्रियमेवपक्षादियथापरमाणुःआकाशसंयोगीदिगुरुत्वादित्यादौ।तत्रव्याप्तिज्ञान
स्याप्यनुमितिरूपत्वात्तज्जन्यानुमितानप्रत्यक्षोपजीवकत्वमतहेऽनुमितयश्चेति।
तत्रापिपतनादिप्रत्यक्षस्यगुरुत्वाद्यनुमितिद्वारोपजीव्यत्वादित्याह।परंपरयेति।।न
नुयत्रेंद्रियप्रत्यक्षज्ञाननिष्ठमुपजीवकत्वमपिसंगतिरेवतथाचाविनिगमकमित्यताह
पुरस्कृत्यश्चेति।अनंतराभिधानप्रयोजकतयामुनिनाऽऽदृतइत्यर्थः।।अथानुमितित्व

रूपप्रमितिविभाजकोपाध्यवच्छिन्ननिष्ठः उपजीवकतोत्कर्षः उत्कृष्टोपजीवकता परंपरयाऽ
पजीवकत्वस्यापिसंगतित्वेप्रत्यक्षफलत्वावच्छेदनापितदस्तीत्याशंकते। यद्यपीति। अदृष्ट
ननी। अदृष्टप्रयोजिका। कार्यमात्रंप्रतिअदृष्टहेतुः। अदृष्टंचयागादिप्रवृत्यधीनं। प्रवृत्तिश्च
ष्टसाधनताधीसाध्यायागादाविष्टसाधनताज्ञानंचवदात्। तत्रशक्तिग्रहः कारणतच्चे
दृष्टेऽत्रशक्तेर्वक्ष्यंतरं विनादृष्टेतत्रप्रयुज्यमानत्वात् इत्यनुमितिरूपं। भवतिशक्त्यनु
मितेःप्रत्यक्षप्रयोजकत्वंसमयःशक्तिःशक्तिग्रहापेक्षयाअव्यवधाननोपजीव्यानुमिति
र्दर्शयति। मक्ष्यतीति। यागोमल्लतिसाध्यः मल्लतिंविनाअसत्वेसतिसत्वात् इत्येवंरूपय
र्थः। आदिनाऽदृष्टसाधनतानुमितिसंग्रहः। ननुअनुमितेरनुमितित्वंरूपप्रमितिविभाज ४

कोपाधवच्छेदनप्रत्यक्षोपजीवकतानतुप्रत्यक्षप्रमितित्वावच्छेदेनानुमित्युपजीवकत्वंईश्वरप्रत्य
क्षेऽभावादतआह। ईश्वरप्रत्यक्षेचिति। तथाचफलयोनिरूपणाफलतावच्छेदनोपजीवकत्वमव
पुरस्कृत्यमुचितंतच्चप्रकृतेऽस्यैवयथैः। नचनिरूप्यतावच्छेदकावच्छेदनउपजीवकत्वमवपुरस्कृ
त्यमुचितंनिरूप्यतावच्छेदकंचप्रत्यक्षत्वमीश्वरप्रत्यक्षसाधारणमितिवाच्यं। इंद्रियार्थसन्नि
कर्षजन्यमित्यादिनानिरूपितस्यप्रत्यक्षत्वस्यईश्वरप्रत्यक्षावृत्तित्वादिति। दृष्टद्वारकं। दृष्टमात्र
द्वारकं। अदृष्टाद्वारकमितियावत्। तेनादृष्टद्वारकस्यापिप्रवृत्त्यादिदृष्टद्वारकत्वेपिनक्षतिः॥
इहअनुमितौ। तथाचं। उपजीवकत्वं। इतरस्य। अदृष्टद्वारकोपजीवकत्वस्य। अविनिगम्यत्वा
विनिगमनायाअविषयत्वात्। एकतरपक्षपातिनीयुक्तिर्हिविनिगमना। अदृष्टद्वारकोपजीवकस्य

चोभयसाधारण्यात्तनैकतरमात्रनिष्ठत्वं।प्रत्यक्षफले अदृष्टद्वारकानुमित्युपजीवकत्ववदनुमानफ
लेप्यदृष्टद्वारकोपदानप्रत्यक्षोपजीवकत्वस्यसत्वादित्यर्थः।स्वरूपतउपजीवकतांविवृणोति।।स
वैचेति।इंद्रियापेक्षेति।अनुमित्यात्मकव्याप्तिज्ञानेचेत्पिपरंपरयेंद्रियस्योपक्षीणायत्वमास्येवेतिभाव
वत्कृतत्वंसर्वत्रमनोरूपेंद्रियजन्यत्वमस्येवेतिभावः।ननुव्याप्तिज्ञानत्वेनैवानुमितिकरणता
तथाचकरणीभूतमीश्वरीयव्याप्तिज्ञानंनकिंचिदपेक्षासात्तिकमतआह।अनुमितिमिति।।
अनुमितिंप्रत्यात्मउपाधानप्रत्यक्षविधयात्यादयतः।तत्करणतेति।अनुमितिकरणतानिर्वाह
कप्रत्यासत्तिश्चविशेषणज्ञानत्वेनस्वजन्यपरामर्शः।सर्वत्रकरणस्यव्यापारसंबंधेनफलोप
धायकत्वात्।विशेषणज्ञानत्वेनजनकतायांचसमानाधिकरण्येप्रत्यासत्तिः।अतःईश्वरीय

व्याप्तिज्ञानंनास्मदीयपरामर्शसंबंधेनफलोपहितं।तथाचतादृशस्वजन्यपरामर्शत्वप्रत्यासत्तिविर
हेणईश्वरज्ञानस्यतत्त्वात्।अनुमितिकरणत्वंशून्यत्वात्।नित्यस्यस्वरूपयोग्यत्वेफलत्ववश्यंभावापत्तेः
जन्यव्याप्तिज्ञानत्वेनैवानुमितिकरणतायावेत्याशयः।।एतेनाप्रत्यासन्नेस्याप्यारण्यस्यदृष्टादेःकरण
त्वात्प्रत्यासन्नस्यभावोनकरणत्वभावसाध्यवइतिप्रत्युक्तं।समान्यतोऽनभिधानात्।यत्तुईश्वरीयव्या
प्तिज्ञानमपिस्वजन्यपरामर्शसंबंधेनानुमितिफलोपहितंभवत्येवकार्यमात्रोपधायकस्यतस्यफलानु
कूलव्यापारात्मकपरामर्शप्रयोपधायकत्वेसिद्धत्वादिति।।तन्न।एवंसतिव्यधिकरणव्याप्तिज्ञानस्यापिका
लोपाधिविधायापरामर्शेपधायकत्वेनव्यधिकरणानुमितिफलोपहितकरणत्वप्रसंगेनविशेष
णज्ञानत्वेनस्वजन्यपरामर्शस्यैवतत्प्रत्यासत्तितयाईश्वरव्याप्तिज्ञानस्यानुमितिफलोपहितकरण

त्वासंभवात्। नचयेनकेनापिसंबंधेनफलोपहितत्वेपिनित्यस्येत्यादिव्यासज्यवृत्तिरेवेति वाच्यं। स्वरूपयोग्यताच्छेदकसंबंधेनफलोपधानस्यैवव्याप्तिनिवेशात्। अन्यथाकपालादेर्घ्यत्वरूपेणघटजनकत्वेप्याकाशादेः संयोगादिसंबंधेनघटाद्यात्मकफलसंबंधसंभवात्एतद्घाद्युपादानस्यवैयर्थ्यप्रयोजनकत्वापातात्। फलायोगव्यवच्छिन्नंकारणंकरणं तादृशमनुमितिकरणेचपरामर्शः तत्करणतायांसमानाधिकरणंप्रयासत्तिः। फलोपहितकरणमेवनिरूप्यअतएववक्ष्यति फलोपहितस्यलक्ष्यतयेति। तथाचेश्वरज्ञानस्यफलसामानाधिकरण्यविरहेणतादृशफलोपहितकरणत्वाभावादियर्थइतितुकश्चित्। अनुमितिकरणत्वावच्छेदनप्रत्यासोपजीवकत्वंव्यवस्थाप्यप्रत्यक्षकरणत्वावच्छेदनोपजीवकत्वस्यव्यतिरेकमाहसर्वपुनरिति। ननुव्याप्तिज्ञानत्वेनत्वा

नुमितिकरणतायांनित्यइवनित्येपदृष्टादिरूपसहकारिविरहेणफलव्यतिरेकसंभवात्नित्यस्येत्यादिव्याप्तेरप्रयोजकत्वादतआह। दृष्टद्वारावेति। तथाचकरणतावच्छेदकधर्मसामानाधिकरण्येनस्वजनकादृष्टजनकेंद्रियजन्यत्वमेवानुमानेआनंतर्यमिधानियामकमितिभावः। इंद्रियत्वसमानाधिकरण्येनस्वजनकादृष्टजनकानुमानजन्यत्वंनास्तीत्याह॥ नचेवमिति। अपिनाकरणतावच्छेदकावच्छिन्नत्वंसूचितं। नचयत्रचक्षुर्घर्षणानंतरंचक्षुषोनंतरंचक्षुरंतरोत्पादः तत्रघर्षणजनकप्रवृत्तिजनकस्यअदृष्टद्वारकस्यस्मृतिसाध्यतानुमानस्यउपजीवकत्वमेवचक्षुरंतरमेवमोषधयानमैनंतरंप्रकृष्टचक्षुरुत्पादपीतिवाच्यं। तत्रघर्षणजनकानुमानस्योषधयानजनकानुमानस्यचप्रयोजकत्वेनजनवत्त्वाभावात्॥

नचैवमदृष्टद्वारकमितिव्यर्थं॥अदृष्टद्वारकानुमानस्येंद्रियजनकत्वाभावादितिवाच्यं।ईश्वरज्ञान
स्याप्येतत्कल्प्यअनुमितिकरणतयातद्वारणायेवतदुपादानादिति।अदृष्टद्वारकोपजीवकत्वस्य
भयत्रापिसत्त्वान्तविनिगमकत्वमितिभावः।ननियमइति।तथाचउपजीवकत्वादितिहेतुपंचम्य
नुपपत्तिरितिभावः।क्वचित्कार्यंनिरूपायीति॥यथात्रैवानुमितिनिरूपणानंतरंतत्करणनिरूपण
मितिभावः।तज्ज्ञानजन्यजिज्ञासाप्रयोज्यत्वंपंचम्यर्थोनतुज्ञानज्ञाप्यत्वमित्याशयेनाह।किंचात
इति।तादृशनियमाभावेकिमनिष्टमित्यर्थः।नन्वनंतराभिधानाव्याप्यत्वंतस्यसंगतित्वमनुपप
न्नंअनंतराभिधानव्याप्यत्वस्यैवतत्तच्छब्दकल्यादतआह।नहीति।संगतिलक्षणपर्य्यालोचनेन
तस्याअनंतराभिधानाव्याप्यत्वंदर्शयितुंतल्लक्षणमाह।आनंतर्यमिति।आनंतर्योभिधानप्रय

जिकायाजिज्ञासातज्जनकंयज्ज्ञानंतद्विषयइत्यर्थः॥।जिज्ञासाजनकज्ञानविषयेघटादावतिव्याप्ति
वारणायप्रयोजकांतं।प्रत्यक्षस्यकारणत्वज्ञानेकारणस्यकार्यमावश्यकमितिक्रमेणकार्यत्व
मेणकार्यसामान्यज्ञानंततःसमान्यधर्मप्रकारकज्ञानस्यविशेषधर्मप्रकारकजिज्ञासाजन
कत्वात्किमस्यकार्यमित्याकांक्षिकाशिष्यजिज्ञासाततःशिष्यस्यकिमस्यकार्यमितिशब्द
प्रयोगः।ततःशिष्यजिज्ञासाज्ञानंगुरोः।ततइष्टसाधनताज्ञानेनानंतराभिधानमितिक्र
मेणजिज्ञासायाअनंतराभिधानप्रयोजकत्वं।नचज्ञानगोचरेच्छाजिज्ञासातत्रचज्ञानेइ
ष्टसाधनताज्ञानंहेतुरितितद्विषयेइष्टसाधनत्वंतिव्याप्तिरितिवाच्यं।तादृशजिज्ञासाप्रतिस
मानविशेष्यकत्वप्रयोज्यस्यनवच्छिन्नायाजनकतातद्वच्छेदकंयत्प्रकारकज्ञानत्वंतत्त्वस्या

क्लवात्। इष्टसाधनताज्ञानस्य हेतुतायां तुसमभा। नविशेष्यकत्वप्रयासत्तिः। नतु कार्यत्वप्रकारक
ज्ञानत्वेन कार्यत्वावांतरधर्मप्रकारकजिज्ञासात्वावच्छिन्नं प्रति हेतुतायां कार्यत्वेनवस्तुगा
त्याघटज्ञानेपि कार्यत्वावांतरधर्मप्रकारकज्ञानत्वेनैवच्छादयात्। अवच्छेदकत्वंचतत्पर्याप्य
धिकरणत्वंतेन कार्यत्वेघटकैकदेशनिरासः। एतल्लाभायैववाक्यपदं। यत्प्रकारकत्वमिधा
नाच्चनकार्यादेर्धर्मिण्यतिव्याप्तिरिति। यत्तु। तादृशजिज्ञासात्वव्याप्यधर्मावच्छिन्नकार्य
तानिरूपितयोग्यकारणतायांयत्प्रकारकज्ञानत्वमवच्छेदकंतत्वमित्यर्थः। उपायत्वावच्छिन्नं
प्रत्येवेष्टसाधनत्वज्ञानस्यहेतुत्वादुपायत्वस्यघटत्वादिसाधारण्येनतादृशजिज्ञासा
त्वव्याप्यत्वाभावादिति। तन्न। कार्यत्वावांतरधर्मप्रकारकजिज्ञासात्वादीनांआनंतर्याभि

धानप्रयोजकजिज्ञासात्वव्याप्यत्वात्तादृशकार्यकारणभावमादायप्रकृतेर्लक्षणगमनासं
भवात्। तत्तद्व्यक्तित्वावच्छिन्नकार्यतानिरूपितयोग्यकारणतायाश्चत्तत्तद्व्यक्तित्वस्यैवावच्छे
दकतयाकार्यत्वप्रकारज्ञानत्वस्यानवच्छेदकत्वात्। यच्चेष्टसाधनत्वं कार्यकारणभावास्म
कतयासंगतिरत्रत्याव्याप्तिर्नदोषायेति। तत्तु। प्रत्यक्षानुमानयोः कार्यकार
णभावेथहितयोः संगतिः। नचेष्टसाधनत्वं। तथाचयदनंतरंयदभिधानप्रयोजकजि
ज्ञासाजनकंज्ञानविषययोयः सतयोः संगतिरित्येवंरूपेप्रत्यक्षानुमानसंगतिलक्षणेइष्ट
साधनत्वेतिव्याप्तिरपरिहारात्। पदधर्मव्याप्यधर्मप्रकारकज्ञानेइष्टसाधनताज्ञानमान
नयोभिधानप्रयोजकजिज्ञासाजनकंसधर्मसंगतिः। अतएवसमान्यधर्मप्रकारकज्ञा

नस्यस्वातन्त्र्येणविशेषधर्मप्रकारकजिज्ञासांप्रतिजनकत्वाभावेपिनक्षतिः।नवाऽष्टसाधनत्व
अतिव्याप्तिरियपिकश्चित्।अत्रवदंति।गेहघटास्तीत्यभिधानानंतरंघटत्वसामान्य
ज्ञानात्कोघटइतिजिज्ञासायांकंबुग्रीवादिमान्घटइतिअनंतराभिधानप्रयोजक
जिज्ञासाजनकज्ञानविषयेघटत्वेऽतिव्याप्तिः।एवंआधारज्ञानानंतरंआधेयत्वसामा
न्यज्ञानात्किमस्याधेयमितिजिज्ञासायांआधेयस्यानंतराभिधानादाधेयत्वादावपि
ति।अत्रब्रूमः।गेहघटास्तीत्यादौघटत्वादिसंगतिरवउपाङ्गातमध्यनिवेशात्।तथा
हि।चिंताप्रेक्षतिसिद्ध्यर्थमुपाङ्गातंविदुर्बुधाइत्यनेनप्रकृतसिध्यनुकूलचिंताकाल
वच्छिन्नप्रकृतानुकूलत्वमुपाङ्गातः।प्रकृतंचतत्रतत्रविशेष्योपादेयं।अनुकूलत्वं च

क्वचिज्ज्ञापकत्वंक्वचिदुपस्थापनकत्वंक्वचिच्चज्ञापकत्वमित्यादिक्रमेणबोध्यं।घटकत्वंयथा।।
व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यंज्ञानमित्यत्राज्ञान।व्याप्तिकस्यव्याप्तिपदवाच्यचक्षनज्ञान
काव्याप्तिरियाकारिकायांजिज्ञासायांव्याप्तिनिरूपणं।एवमिंद्रियासन्निकृष्टपर्वतीवधू
मिव्याप्तिविशिष्टत्वधीनतदुपस्थापकंविनेतितदुपस्थापकंकिमियाकांक्षायांसामान्य
लक्षणानिरूपणं।एवंविशिष्टज्ञानस्यानुमितिहेतुत्वंकिंज्ञापकमियाकांक्षायांपरामृ
शस्यानुमितिहेतुत्वव्यवस्थापनमितितत्रतत्रोपाङ्गातपदप्रयोगः।प्रकृतेचाज्ञातघ
टपदार्थस्यघट्यास्तीयतोघपदवाच्यचक्षनज्ञानेकोघटपदवाच्यइतिजिज्ञासायांकंबुग्री
वादिमान्घटइत्यादिक्रमेणनिरूपणंप्रकृतघटास्तित्वसिध्यनुकूलचिंताकालीनस्यघ

टास्तित्वघटकत्वस्यसत्वेनोपोद्घातत्वसंभवात्।एवमाधेयत्वादिकमपिप्रसंगमध्यनिवेश्यते।
आधारप्रसंगेनस्मृतस्याधेयत्वस्यानुपस्थणीयत्वज्ञानेनतत्जिज्ञासोदयात्।केचित्तु।
घटास्तीयादौघटपदवाच्यत्वमाधेयत्वादिकंचप्रसंगएव।अनुपस्थणीयत्वंहिउपस्थानहे
तावच्छेदकधर्मवत्वंसचधर्मीघटपदवाच्यत्वाधेयत्वादिः।उक्तरूपेणैवतदनुगमान्नाधि
क्यमित्याहुः।स्मृतिकालावच्छेदेनोपस्थानहेतुप्रसंगः।अत्रस्मृतिकालावच्छिन्नत्वरूपस
इतरांशेज्ञातोपयोगी।स्मृतिरनुपस्थणीयतावामिधातुरवस्वयंस्मृतायाजिज्ञासानुदया
त्स्वीयानुपस्थणीयत्वज्ञानस्यजिज्ञासाजनकत्वाभावाच्चेकेचित्तु।श्रोरेतवस्मृतिरनुपस्थ
णीयतायवक्तुःअस्मिन्सुष्ठवक्तुमुपस्थनभविष्यतीतिप्रतिसंधायश्रोतुजिज्ञासोदयादित्या

हुः।एवंप्रकृतसिद्ध्यनुकूलचिंताकालावच्छेदेनप्रकृतानुकूलत्वमुपोद्घातः।चिंताचवक्तुर्य
ग्यत्वात्।अत्रापितादृशकालावच्छेदःस्वरूपसन्नुपोद्घातपदनियामकः।इतरांशोज्ञातोपयोगी
एवंप्रतिबंधकीभूतशिष्यजिज्ञासानिवृत्तौअवश्यवक्तव्यत्वमवसरः।अत्रापिनिवृत्त्यंश
स्वरूपसन्नितरांशज्ञातोपयोगी।यथानुमाननिरूपणानंतरंतादृशजिज्ञासानिवृत्तौअव
श्यवक्तव्यत्वज्ञानात्किंवक्तव्यमितिश्रोतुजिज्ञासायामनंतरंउपमाननिरूपणमिति
ज्ञा।ज्ञातेतार्थेसिद्धत्वमवसरइतिकश्चित्।तस्यापिपूर्वमिवपर्यवसानाभवतिहिजिज्ञा
साविषयसिद्धत्वइदंज्ञातेअन्यत्किंवक्तव्यमितिजिज्ञासेति।निर्वाहकत्वंएककार्यनिर्वा
हकत्वंतच्चप्रयोजकत्वंकारणकारणतावच्छेदकसाधारणं।यथाव्याप्तिपक्षधर्मतयोरनु

मित्यजनकत्वेपितज्ञानकीभूतज्ञानेविषयतावच्छेदकत्वेनककार्यानुकूलत्वं।तत्रसामान्यतो
नुमितिलक्षणैककार्यानुकूलत्वज्ञानंकिंतदनुकूलमितिजिज्ञासायांमंतरूपसधर्मतानि
रूपणमिति।एककार्यत्वंमेकस्यकार्यतात्रयोऽयेतासाचजन्यताजन्यज्ञानविषयताचय
थाईश्वराश्रित्यारनुमानाजन्यत्वेपितज्जन्यज्ञानविषयत्वलक्षणैककार्यत्वसंगत्याईश्व
रवादानंतरंमीमांसकनशक्तिराशंकिता।नैयायिकनेश्वरसिद्धनंतरशक्तिनिरस्यपर
मप्रयोजनंत्वनुमानस्यापवर्गदित्यनेनेश्वरसिद्धपवर्गयारनुमानजनत्वलक्षणैककार्य
त्वसंगतिःसूचिता।सामान्यतोनैककार्यत्वज्ञानेकिमन्यत्कार्यमितिजिज्ञासायाविशिष्य
कार्यांतराभिधाननसामान्यलक्षणसंभवात्।यत्तु।निर्वाहकत्वमुपपादकत्वमिति।। ११

नन्वनुपपादकत्वंनज्ञापकत्वानुपोद्घातनगतार्थत्वात्।नकारणत्वंहेतुतयागतार्थत्वात्।एवंसर्वत्र
हनीयं।अत्रचविभिन्नतासंयोगेसंगतिव्यवहारभावादेकत्वाक्यतापन्नत्वंसामान्यलक्षणवि
शेषलक्षणंचदेयं।अत्रंचतादृशजिज्ञासास्वरूपयोग्यत्वस्यापितिप्रसक्तत्वात्फोपधानस्य
चसर्वत्रासंभवात्प्रसंगादन्यतमत्वंतत्वमितिध्येयं।ज्ञायतेचेति।कार्यज्ञातेकार्यसका
रणकमितिरीत्याकारणत्वस्यज्ञानात्किमस्यकारणमितिजिज्ञासा।कारणज्ञातेकारण
सकार्यकमितिरीत्याकार्यत्वस्यज्ञानात्किमस्यकार्यमितिजिज्ञासेत्यर्थः।द्वयोरपीतिता
थाचसंगतेरनंतराभिधानव्याप्यत्वसंतरासंभवितादृशवादिमतेपिकारणेव्यभिचार
दितिभावः।इत्थंचसंगतेरनंतराभिधानव्याप्यत्वंच।एवंचापजीवकत्वादितिपंचमानहे

नुतायांकिंनुज्ञानजन्यजिज्ञासाप्रयोज्यतायामितिभावः। लाघवादत्रेवेति। यद्यपिउपमानएवसं
गतिप्रदर्शनेनादृशशब्देनैवाभिधानुशक्यत्वान्नशब्दलाघवं। तथापिप्रकरणलाघवादि
त्यर्थः। प्रकरणंचसंगतिप्रदर्शनप्रयोजकाकांक्षाप्रत्यक्षानंतराभिधानउपमानाआगाभिधा
नेकिंनियामकमितिजिज्ञासायाः औत्सर्गिकत्वेनतामनादृत्यउपमानग्रंथेतसंगतिप्रदर्श
नेआकांक्षांतरकल्पनेगौरवादितिभावः। ननुबहुत्वादिसमत्वेनसंगतिरतआह। सुप्रसि
द्धतयेति। अनुमानस्यसुप्रसिद्धत्वेनसामान्यधर्मप्रकारकज्ञानेविशेषधर्मप्रकारकजि
ज्ञासासंभवादितिभावः। सुप्रतिपादतयेयत्रहिनिरसनीयाल्पवादीति। निरसनीयाल्पवा
दित्वप्रतिपत्तिर्यन्नत्वेनेत्यर्थः। दुरूहत्वज्ञानेनतत्रबलवदनिष्टसाधनत्वज्ञानात्क

दाचिदिच्छाप्रतिबंधःस्यात। अतःसुबोधत्वंप्रथमंजिज्ञासायाउपयोगिदुरूहत्वेहेतुर्निरस
नीयबहुवादीति। ननुसुगमस्यत्वयमप्यूहितुंशक्यत्वादितिन्यायेनसुगमंमेस्यादुरूहे मु
मुक्षुकस्यचित्तजिज्ञासाप्रथमंभवत्येवेयतआह। औत्सर्गिकीमिति। ननप्रतिबंधकीभू
तायाजिज्ञासायानिवृत्तिःप्रतिबंधकाभावांतरवत्स्वरूपसतीहेतुः। नतुज्ञातामा
नाभावादतआह। यथाचेति। आकरेप्रमाणतत्त्वबोधादौ। प्रतिबंधकजिज्ञासानिवृत्तौ
सत्यांअवश्यवक्तव्यत्वमवसरः। वक्तव्यत्वज्ञानादेवजिज्ञासेतिनतल्लक्षणाव्याप्तिरंतएव
ग्रंथशेषेअवसरसंगत्याभावसूचनायप्राचामितिशब्दस्यविरम्येतइतिशब्दस्यवाउप
निबंधः। शब्दांतरेति। उपमितिविषयीभूतगवपदातिरिक्तगोसदृशपदादिशक्तिग्राह

कमित्यर्थः। शक्तांतरसमवग्रहकमनुमानंकेवलमतिदेशवाक्यार्थस्मृतिरूपव्यापारमात्रो
पधानउपयोगिनत्वुपमितौ। तत्रगोसादृश्यादीनामविषयत्वात्। अतःउपमितिविषयी भू
तगवयपदवृत्तिनिमित्तत्वबोधकमनुमानमुपजीव्यत्वेनदर्शयति। सप्रवृत्तीति। समान
वृत्तिवद्यतयागवयपदप्रवृत्तिनिमित्तत्वं योविषयकंगवयपदंसप्रवृत्तिनिमित्तकंसाधु
पदत्वादित्याकारकमित्यर्थः। गवयोगवयपदप्रवृत्तिनिमित्तवान्इत्युपमितौगवयप
दप्रवृत्तिनिमित्तस्यविशेषणतयातद्ग्रहकस्यानुमानस्योपजीव्यत्वादिति भावः। इ
दंचिंतामणिकारमतं। आचार्यमतंतुगवयोगवयपदवाच्यइत्येवोपमितिस्वीकारादि
तिध्येयं। तत्रोपमितावयंक्रमः अगृहीतगवयपदशक्तिकस्यकादृशोगवयपद

वाच्यइतिप्रश्नानंतरंगोसदृशोगवयपदवाच्यइत्याकारकमतिदेशवाक्यार्थज्ञानं। ततःसादृश्य
विशिष्टपिंडदर्शनंततदवकरणंततोऽतिदेशवाक्यार्थस्मृतिः सैवचव्यापारः ततोगवयोगवय
पदवाच्यइत्युपमितिरिति। नन्वेतावताऽउपमितिंप्रत्युपजीवकत्वमादर्शितंनतूपमानत्वमू
पपद्यतीत्यतआह। अंतततइतिऽउपमितिकरणस्यापिकार्यत्वेनादृष्टजन्यत्वात्ततददृष्टजन्य
कप्रवृत्त्यापयिकानुमानसापेक्षमेवोपमानमित्यर्थः। अयंगवयपदवाच्योगवयपदवान्गवयसय
गादित्यनुमानव्यक्तिविशेषस्यापिगवयोगवयपदवाच्यइत्युपमानोपजीवकत्वादाह। नि
खिलमवेति। तत्रानुमानत्वावच्छेदेनोपजीव्यतेतिनदोषः। कचिदित्यत्वरसबीजंतुबहुवा
दिसंमतत्वादितिमूलेनतादृशसंगतेरप्रदर्शनात्। ग्रंथासंदर्भः। ननुसंगतेरनियामकत्वेऽ

नंतराभिधानेकिंनियामकमतआह।संभवतिवेति।एवंचनिरूपणयोःकार्यकारणभावः।संगति
मुद्रयानात्रुटितदोषः॥निरूप्ययोरेवनिरूपणयोरपिकार्यकारणभावायथाकथंचित्तज्जिज्ञासा
जनकद्वारासंगतिरेवेत्यपिकश्चित्।इहप्रत्यक्षानुमानस्थलेनिरूपणयोःप्रत्यक्षानुमानयोः ज्ञान
एवंचप्रत्यक्षपूर्वकत्वेनानुमानज्ञानजननार्थंप्रत्यक्षज्ञानस्यप्रथमंपरामर्शतत्वादादौप्रत्यक्ष
मभिहितमितिभावः।निरूपणयोःज्ञानजनकशब्दयोः।कार्यकारणभावः।प्रयोज्यप्रयोजक
भावइत्यर्थइतिश्चित्।अथतत्पूर्वकंत्रिविधमनुमानंपूर्ववच्छेषवत्सामान्यतोदृष्टंच
तिसूत्रं।अथप्रत्यक्षलक्षणानंतरंअनुमानमुच्यतइतिशेषः।त्रैविध्यंदर्शयतिपूर्ववदि १७
त्यादिना।पूर्वंकारणंतल्लिंगकं।यथायंततुसंयोगनमहापटानुमानंशेषःकार्यंत

लिंगकं।यथानद्याउपरिदृष्टोवृष्टिमतीविशिष्टप्रवाहत्वादिति।सामान्यतःदृष्टंकार्यकारणभाव
मिन्नलिंगकं।यथाइच्छाद्रव्याश्रितागुणत्वादिति।यद्वा।पूर्वंकेवलान्वयि।शेषोव्यतिरेकीसामा
न्यतःसमान्येनान्वयव्यतिरेकिसाधारणसहचरणंगृहीतं।एवंचकेवलान्वयिसाध्यकं
केवलव्यतिरेकिसाध्यकमन्वयव्यतिरेकिसाध्यकमित्यर्थः।अत्रचानुमानंअनुमितिः।।
कारणलिंगिकेयंव्याख्येया।सूत्रेतद्घतइत्यध्याहृत्यतादृशानुमितिर्यतस्तदनुमानमि
तिरीत्याऽनुमितिकरणस्यापिलक्षणंलभ्यं।फलायोगव्यवच्छिन्नेकारणंकरणमितिमते
चरमीयलिंगपरामर्शएवानुमानमित्यनुमानपदं।यथाश्रुतार्थकमेवतद्घतइत्यपि
नाध्याहर्तव्यमिति।व्याख्यादौयादिनासाध्यसाधनसहचारपक्षादिपरिग्रहः।अत्रच

तत्पूर्वकमित्यत्रतत्पदेनेंद्रियार्थसन्निकर्षोयत्तत्वेनप्रत्यक्षस्येंद्रियार्थसन्निकर्षोत्पन्न
ज्ञानमित्यादिपूर्वसूत्रेणप्रक्रांतस्यपरामर्शः।तेनस्वरूपनिरूपणयोरनुमितिकरणनिरूप
णयोः कार्यकारणभावावगमः।अन्यथाप्रत्यक्षफलनिरूपणानुमितिकरणनिरूपणा
योरेवापजीव्यापजीवकभावलाभेनासंगतिःस्यादितिध्येयं।नचैवमपिसात्रक्रमोपपाद्न
स्यात्रत्रयक्रमानापपादितइत्यतआह।आत्रापीति।अत्रापिअनुमानखंडेपि।सहचा
रप्रत्यक्षेति।यद्यपिव्यभिचारज्ञानविरहसहकृतंसहचारदर्शनंव्याप्तिग्रहकमितुक्तं।।
तत्रचप्रत्यक्षविशेष्यमितिकथंतन्निरूपणस्यहेतुत्वं।तथापिप्रत्यक्षअप्रतिपाद्यप्र
त्यंसंव्याप्तिग्राहकमितिबोधयितुंपरामर्शउक्तइत्यत्रापिप्रत्यक्षनिरूपणंहेतुरिति १५

बोध्यं।अत्रापिप्रत्यक्षखंडोइंद्रियत्वेनइंद्रियजन्यज्ञानंप्रत्यक्षमितिप्रत्यक्षलक्षणाकरण
त्वकरणनिरूपणयोः कार्यकारणभावावगमः।तस्यतेननिरूपणानुमानिरूपणस्य।अनु
मानोपमानयोरपित्रक्रमनियामकमाह।एवमिति।अनुमानस्योपमानांतर्गतत्वमप्रस
क्तंतयाननिराकृतं।उपमानस्यचअनुमानांतर्गतत्वंप्रसक्तं।एकदेशेनानुमाननवो
पमानकार्योन्यथासिद्ध्युपगमात्।अतएवउपमानखंडेअनुमानमिन्नत्वेनोपमान।
निरूपितमितितदर्थमनुमानंप्रागेवनिरूपितमितिभावः।नन्वनुमानलक्षणंकर्त्तव्यंअनु
मितिकिमितिलक्षितेयतआह०लक्षणंत्वरूपेति।लक्षणंतत्करणमित्यादिना।।
स्वरूपंतुत्रैविध्यादिनाप्रामाण्यमथानुमाननप्रमाणमित्यादिनानिरूपितमादिनाच्च

नुमानंत्रिविधमितिविभागादिसंग्रहः।एषुसर्वेष्वनुमितेर्विशेषणत्वादितिभावः।प्रामाण्यादिभिरितित्व
नीयाप्रकारितायांनिरूपणेशब्दः।तेयाचलक्षणस्वरूपप्रमाण्यादिप्रकारकशब्दविषयेअनुमा
नविशेषणत्वेनअनुप्रविष्टोऽयमनुमितिरित्यर्थोलब्धप्रथमांतान्वयविरोधः।तेयाचाधारसप्त
म्यांविषयकनिरूपणेप्रकारकत्वेचसंबंधः।प्रकारित्वंविषयित्वंचव्यापारानुबंधितयाबोध्यं।अ
नुमानेनिरूपणीयेसप्तमीअनुमाननिरूपणेकर्त्तव्येऽर्थइतिकश्चित्।अनुमाननिरूपणी
येअनुमाननिरूपणार्थंतथाचनिमित्तसप्तमीअनुमानस्यविशेष्यतयानिरूपणस्यचविशेषण
तयापूर्ववाक्येनबोधितत्वात्तच्छब्देनानुमाननिरूपणइतिपरामर्शीस्यात्संभवाद्विशेषणस्यनि
रूपणस्यनिमित्ततयाविशिष्टनिमित्तस्यविवक्षितत्वात्तथात्वमित्यन्येत्वभयत्राप्यनुमि

तिर्निरूप्यतइत्यन्वयः।ननुभवतुसर्वत्रानुमितेरनुप्रवेशःअनुमितिश्चेत्तमेवानुमानलक्षणं
किमितिकृतंअन्यथापितल्लक्षणासंभवादतआह।करणस्येति।अत्रमूर्त्तीःकरणत्वंतच्चक्रि
यामेदेनभिन्नंभवेदेवेत्यंतथाचप्रत्यक्षादिकरणतोऽनुमितिकरणतायाविभिन्नत्व
मेवप्रत्यक्षानुमानयोर्विभिन्नप्रमाणत्वव्यपदेशेभयविषयकस्यैकस्यस्मरणस्या
भिन्नत्वेपिशब्दानुमानत्वेनप्रथक्प्रमाणव्यवहारात्तथाचप्रत्यक्षादिप्रमितितोऽनुमिते
र्वैलक्षण्यंज्ञानार्थेअनुमितिभावः।अत्रक्रियालक्षणवाक्ये।कर्मधारयोत्तरेतिननुभाव
प्रत्ययस्यसमानाधिकरण्यत्वेनतत्पदार्थतावच्छेदकसामानाधिकरण्यत्वेनवाशक्तिरा
घनीलत्वात्पत्वयोःसामानाधिकरण्याभावःतयोःपदार्थतावच्छेदकत्वेनसामाना

धिकरण्येऽनन्वयात्। न चतत्सदेनीलोत्पलत्वयोरवलक्षणागौरवात्। नीलोत्पलत्वयोर
भेदस्यबाधितत्वात्। नीलोत्पलपदान्नीलाभिन्नोत्पलानुभवापलापाच्चद्वितीयेनी
लोत्पलीयंनीलोत्पलत्वसामानाधिकरण्यमित्यवरुध्याप्रत्ययार्थतादृशसामानाधि
करण्यावच्छेदकतासंबंधेनप्रकृत्यर्थस्यनीलोत्पलस्यान्वयोपपादनेनकदाप्यन्वयाभा
वप्यनतशक्तिकल्पनापत्तेः। एवंघटत्वादिप्रकृत्यर्थतावच्छेदकसंबंधमस्यप्रतिपादने
नीलोत्पलत्वमित्यत्रतादृशसामानाधिकरण्यस्यतिव्युत्पत्तिभेदकल्पनमपीतिअ
त्रवदंतिघटत्वमित्यादौकुम्भशक्तिरवप्रकृतेतादृशसामानाधिकरण्यलाभः। तत्र
हिघटतरावृत्तित्वसतिसकलघटवृत्तित्वेनप्रकारेणघटत्वमुपस्थाप्यतत्रप्रकृ

तितएवघटस्यलाभःइतरावृत्तित्वादौभावप्रत्ययस्यशक्तिःतत्रापिइतरतद्वृत्तित्वंअभावःसा
कल्पंवृत्तिमद्यविशकलितमर्थः। इतरवृत्तित्वप्रतियोगिकाभावस्यातिप्रसक्तत्वात्। इतर
वृत्तित्वावच्छिन्नाभावस्याप्रसिद्धत्वात्तद्घटत्वादावाधाच्चविशिष्टस्यशक्यत्वासंभवा
त्तद्व्युत्पत्तिवैचित्र्याच्चैकपदोपात्तानामपितावतांपरस्परान्वयेनबोधः। तत्रप्रकृति
जन्यबोधंप्रतिसंबंधेनतत्प्रतियोग्यवच्छेदकधर्मस्यप्रकारतातेनसंबंधेनइतरा
वृत्तित्वंतत्तद्वृत्तित्वंचार्थः। तेनघटतरस्मिन्कालादौकालिकसंबंधेनघटत्वस्य
वृत्तावपिनसतिः। नवाघटत्वमित्यादौवंबुग्रीवादिमत्वादेर्भानंनीलोत्पलत्वमि
त्यादौचनीलाभिन्नमुत्पलंप्रकृत्यर्थः। तत्रप्रकृत्यर्थतावच्छेदकंनीलाभिन्नोत्पलत्व

तच्च नीलत्वसमवाय्यभिन्नसमवेतोयत्ववांतस्यचोपाधितयास्वरूपसंबंधेनयत्प्रकृतिज
न्यबोधप्रकारतोतनसंबंधेनतद्द्रव्यभिधानेचसामानाधिकरण्यापिमानंअभदंश्रुअ
त्याधिकस्यभानेपिनीलत्वसमवायिसमवायस्यापिभानादिति।प्रमेयत्वमित्यादौच
इत्रावृत्तित्वांशेनभासतेऽप्रसिद्धत्वात्।किंतुसकलप्रमेयवृत्तित्वेनचगुणान्यत्वविशि
ष्टसत्वमित्यादौविशिष्टस्यानतिरिक्तयातदितरासमवेतत्वस्यमहत्वमित्यादौचस
कलमहद्वृत्तित्वस्यमहत्परिमाणकाधादनन्वयप्रसंगाइतिवाच्यं।तादितरत्वव्याप
कायतोभावप्रतियोगितानवच्छेदकधर्मवत्वस्यैवतदुभयदलनविवक्षितत्वात्त
दितरत्वव्यापकतिकरणाच्चघटत्वमित्यादौनद्रव्यत्वादभानमिति।अत्रनव्याःएवंस

तिएकत्वमित्यादौपरिमाणादेःकथंनलाभःनचप्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्ट
संबंधेनवतदितरावृत्तित्वंतद्वृत्तित्वंचप्रतीयतेयत्वंनिरूपितसमवायेनचपरिमाणादि
कमवर्त्ततीतिनतत्रैकत्वपदंवाच्यमितिवाच्यंएवंसतिनैसतिशक्तिकल्पनावश्यकत्वेघट
त्वादिषुप्रातीस्विकरूपेणवशक्तिरस्तुकिमितरावृत्तित्वादिगौरवसहिष्णुतयायद्वा॰धर्म
त्वेनवशक्तिरस्तुप्रकृत्यर्थतावच्छेदकतानिरूपितसंबंधेनतत्रप्रकृत्यर्थस्यान्वयःत
नचघटत्वमित्यादौनद्रव्यत्वादेर्बोधःअतएवगुणत्वकिरणावल्यादृथक्त्वमित्यादौप्रकृ
त्यर्थतावच्छेदकानवगुणानभावप्रत्ययः।प्रतिपादयतितप्तीतिसूक्तताद्रव्यत्वेनधर्मत्व
नवत्वन्यदतदितिधीधितिवृतः।विशिष्यशक्तौचनीलत्वेसत्वसामानाधिकरण्यप्र

क्लेभावप्रत्ययार्थः नीलोत्पलस्यपङ्कत्यर्थस्यतादृशसामानाधिकरण्येऽवच्छेदकत्वेना
न्वयः। घटपटत्वमित्यत्रद्वंद्वोत्तरस्यवनीलोत्पलत्वमित्यत्रकर्मधारयोत्तरस्यापिभाव
प्रत्ययस्यसामान्यशक्त्यापस्थितयोर्नीलत्वोत्पलत्वयोः कर्मधार्योत्तरभावप्रत्ययत्व
वच्छिन्नयाविशेषशक्त्यापस्थितेसामानाधिकरण्यविशेषणत्वेनान्वयः।नीलो
त्पलस्यचपङ्कत्यर्थस्याधेयत्वसंबंधेननीलत्वोत्पलत्वयोरवच्छेदकत्वसंबंधेन
समानाधिकरण्येनान्वयइत्यपिकेचित्।बाधितेति०बाधितायाधीतादृशसामा
नाधिकरण्यविषयकयथः भ्रांतानुमितीति।भ्रांतेर्भ्रमः नचह्रदोवह्निमान्सा
ध्याप्तिविशिष्टत्वह्रदवृत्तित्वसामानाधिकरण्याप्रसिद्ध्याकथंतत्ज्ञानंभ्रमइतिव

च्यंतत्रह्रदवृत्तित्वेव्याप्तिविशिष्टत्वसामानाधिकरण्यावगाहिज्ञानमेवतदुभयसामान
धिकरण्यज्ञानपदार्थइत्याशयात्अतएवानेनदोषेणदंनिराकरिष्यति०केचित्तुपर्व
तोवह्निमान्धूमोपलब्धेरित्यादौव्याप्तिविशिष्टत्वपर्वतवृत्तित्वसामानाधिकरण्यस्य
दृष्टांतेऽप्रसिद्धेतस्यधूमोपलब्धेरारोपात्यथार्थानुमितिस्तत्रनाव्याप्तिरित्यर्थः
भ्रांतानुमितीतिभ्रांतस्यानुमितिःभ्रमजन्ययथार्थानुमातीत्यर्थइत्याहुस्तन्नसद्भ
विरोधादुपेक्षितानियमनइति।यत्रवह्निव्याप्यवान्वह्निव्याप्तिविशिष्टपर्वतवृत्तिधू
मवांश्चपर्वतइत्यर्थेकारकःपरामर्शःतत्रतत्समभवोपियत्रवह्निव्याप्यवानित्येवप
रामर्शस्तत्रतद्भावादित्यर्थः।ननुतत्रूपेणहेतुत्वेयहाद्यत्रतादृशबोधाभावस्तत्रानु

मितिरपक्रयनीयस्यतआह०गौरवेणेति।ननुसामानाधिकरण्येमकाधिकरणसंबंधःएवंवस
मूहालंबनात्विशिष्टज्ञानस्यभेदान्यथानुपपत्याविशेषणप्रतियोगिकविशेष्यानुयोगिक
संबंधोविशिष्टधीविषयत्वेनाभ्युपेयःतथाचवह्निव्याप्यधूमवान्पर्वतइत्यत्रधूमवह्नि
व्याप्तिविशिष्ट्यानुयोगिकपर्वतवृत्तित्वप्रतियोगिकत्वरूपतदुभयसामानाधिकरण्यभास त
एवस्यतआहःसंबंध०इति।समूहालंबनाद्भेदान्यथानुपपत्त्याऽनुयोगित्वप्रतियोगित्वादि
संबंधभानवत्समानाधिकरण्यभावमपिभविष्यतीत्यतःसंबंधेति।कश्चित्संबंधसंबंधा
विषयकत्वेपिसमूहालंबनव्यावृत्तस्यविशिष्टज्ञानत्वस्यापपादितत्वादित्यर्थः।समूहाल
बनसर्वत्रविशेष्यताविशिष्टज्ञानविशेषणप्रकारतासंसर्गचसंबंधताविशेष्यविशेष्यता २०

"

स्यविषयतेतिविषयावैलक्षण्येपिविषयतावैलक्षण्यादेववैलक्षण्यंविशिष्टज्ञानस्येति
भावः।ननुविषयावैलक्षण्येपिविषयताविशेषात्ज्ञानवैलक्षण्यंजितंसाकारवादिनात्
याचार्थेनवाहिधियांविशेषइत्यनुरोधात्समूहालंबनाविषयाऽनुयोगित्वप्रतियोगित्व
चविशिष्टधीविषयइत्यपेयमतआह०भ्रमस्थलइतिकृद्वह्निमानितिभ्रमानुमिति
स्थलइत्यर्थः।ननुअसद्वैसमानाधिकरण्यंतत्प्रसिद्धमतआह०असदितिअसत्त्व
विशिष्यस्यसद्रूपराहणेपिभानस्यनिरासादित्यर्थः।नचप्रतियोग्यप्रसिद्धिःशुक्ति
विशेष्यत्वावच्छिन्नरजतत्वप्रकारकत्वस्यरजतत्वप्रकारतासामान्यस्यवायत्वं
चितप्रमात्वचटकप्रकारतानियामकसंबंधनिरूपितत्वनियमवत्त्वनाथतस्तन्निरा

सात्। असद्विशिष्यभानेतुरजतत्वप्रतियोगिकशुक्त्यनुयोगिकविशिष्टस्यकिंचित्प्रमा
त्वच्चटकप्रकारकत्वानियमकतयाशुक्तौरजतत्वप्रकारकतायांतादृशसंबंधनिरूपितत्व
भावेनतादृशनियमभंगादितिननुपक्षवृत्तित्वव्याप्तिविशिष्टत्वसामानाधिकरण्यावृ
गाहिज्ञानमव्याप्तिविशिष्टत्वपक्षवृत्तित्वसामानाधिकरण्यज्ञानपदप्रतिपाद्यतत्र
सामो॰नाधिकरण्यव्याप्तिविशिष्टत्वपक्षवृत्तित्वद्वयान्वयबोधपितादृशज्ञानान्व
यःबोधात्तथाचतादृशज्ञानजन्यत्वलक्षणंनोव्याप्तमतआहवांतेरितितथाचता
दृशलक्षणंनेतादृशलक्षणवाक्यप्रतिपाद्यमितिभावः।लक्षणाव्याप्तिमत्कालक्षणावा
क्यजन्यशाब्दबोधानुपपत्तिमप्याहवांतेरितिनुकश्चित्।विषाणीविषाणित्वावच्छि

नशशसंबंधितिशशविषाणीत्यत्रषष्ठ्यर्थलक्षणयाशशसंबंध्यभिन्नविषाणीतिशाब्दबो
धशशसंबंधिभिन्नस्यैवशशसंबंधाभावस्यापिविषाणेनिर्णयोविरोधीत्यर्थः।प्रमाणप्र
स्तावादितिप्रमालक्षणमितिविविच्यतइत्यतःप्रमाकरणालक्षणस्यैवप्रस्तुतत्वेननतदर्थप्र
मालक्षणस्यैवोचितत्वादित्यर्थःप्रमेतिननुप्रमाकरणालक्षणार्थानुपयोगिनीभ्रांतिरय
मर्थः।उपाध्यायमतेपक्षतावच्छेदकसामानाधिकरण्येनैवसाध्यंसर्वत्रानुमितिविष
यःनतुपक्षतावच्छेदकावच्छेदेनापिअवच्छेदकत्वस्यव्यापकत्वाच्चटकत्वेनसाध्यस
बंधविधयाभानासंभवात्तथाचगंधप्रागभावावच्छिन्नोघटोगंधवानित्यनुमितिः।
प्रमेवस्यतआह।यद्यपितिपक्षतावच्छेदकावच्छेदेनसाध्यमानस्यानुभविकत्वादसं

सर्गायहादिसामान्यसामग्रीवशादनुमितावप्यवच्छेदकत्वंभासतएवेतिभावः। चरमेति
प्रथमज्ञानपदस्यतत्तत्त्वेतत्रैवेतिव्याप्तीतिभावः। प्रमापरमिति। यावद्भ्रमभिन्नत्वेप्रमा
त्वं। अव्याप्तिरिति। अव्याप्येव्याप्यत्वा। वागाहिना अपक्षधर्मवापक्षधर्मत्ववागाहिनेत्यर्थः
वस्तुतावस्कन्धस्यासाध्यवान्नयःपक्षस्तद्वगाहितयाननुतस्याअनुमितिलिंगापधा
नांशेभ्रमत्वनालक्ष्यत्वमतआह। लिंगोपहितेतिप्रमाणाभावादितिशेषः ननुवस्कन्ध
स्यासाध्यवान्नयःपक्षस्तत्रश्चरस्यवतादृशज्ञानप्रसिद्धमतस्तज्जन्यत्वस्यतदनु
मितासत्वान्नाव्याप्तिरतआह ईश्वरेति। अतिप्रसंगकत्वादितितादृशपरामर्शत्वेनत
स्यहेतुत्वाभावादुपादानप्रत्यक्षत्वेनतज्जन्यत्वस्यप्रमामात्रेऽतिप्रसक्तत्वादितिभा २२

वः अतएवतादृशप्रमानुमितावव्याप्तेरवतज्ज्ञानंवेति व्याप्तिविशिष्टयत्पक्षधर्मताज्ञान
मित्येवंरूपमप्यमीमतत्पुरुषापिनेत्यर्थः। आदिनाषष्ठीतत्पुरुषापिनेत्यर्थः। पदार्थोता
वच्छेदकेति। नचवस्त्वरूपकशेषस्यद्वंद्वापवादकत्वानुपपत्तिरकविषयत्वाभावादि
तिवाच्यंपदजन्यप्रतीतिविशेष्यरूपस्यपदार्थस्यभेदापक्षयापदजन्यप्रतीतिविष
यभेदएवद्वंद्वस्यलाघवेनकल्पनात्। एवंचनीलघटयोरित्यत्रपदजन्यप्रतीतिप्रक
रभेदात्घटादित्यत्रविशेष्यभेदाद्वंद्वस्यप्रसक्तिः अक्षाद्दित्यत्रज्ञानार्थएववावस्त्वरूपक
शेषस्यसार्थकत्वंयथाश्रुतनानुपपत्तिरिति। ननुनीलघटयोरभेदइत्यादौद्वित्वंकु
त्रान्वेतुनतावद्विशेष्यतास्यकत्वात्। नविशेषणेऽतयोःपदार्थतावच्छेदकत्वेननिरा

क्षत्वानुनचप्रकृतार्थवृत्तिसंख्यावाचकत्वंसुपांननुनन्मात्रवृत्तिसंख्यावोधकत्वं। अनएवैकस्मि
नुपांभेदः परमाणौ आपदस्यत्तद्गतगुणानादायवहुवचनंसमष्टिनंवहुमानोपाध्यायेतिवद्
च्यं। एकस्मिन् घटेएकोघटाइत्यत्रासाधुत्वज्ञानाभावदशायांशाब्दोधप्रसंगात्। नत्रहिवचन
पदसाधुतायैवनिचतद्दैकमेधारयएवास्तुकिमर्थंपदार्थे भेदमनादत्यहृद्दकल्पनमितिरच्यं
नित्यघटयोरित्यत्रकर्मधारयेनीलाभिन्नघटत्वेनोपस्थितौ अभेदस्यसंनिराकांक्षत्वादन्वी
यप्रसंगात्। ननुपदार्थयोरभेदस्थलेपिहृद्दसमासाधुत्वेकर्मधारयः किमर्थंपृथगंगीक्रियतइत्य
तआहपदार्थद्वयेति। तथाचयत्राभेदसंसर्गकबोधेतात्पर्यंतत्रहृद्दसाधुत्वातुकर्मधारयाद्व
तादृशबोधइतिभावः। भेदाभेदोदासीनेति। भेदाभेदाविषयकेत्यर्थः। इदंचतादृशपदार्थद्व
यबोधविशेषणपदार्थयोरभेदेकर्मधारयवत्पदार्थयोर्भेदेवहृद्दइत्यनुशासनस्व

रसिद्धमतम। ननुस्त्र्याद्यविशिष्टपदस्येति। यत्तुएकस्मिन्नेवचैत्रेचैत्रत्वचैत्रसंबंधानांपर
स्परप्रतीतिविषयाणांभेदेनहृद्दापत्तिरतोविशिष्टेतितदसत्। एकपदहृद्दस्यतदपवादैकश
षस्यचापादयितुमशक्यत्वात्। किंचसमस्यमानप्रत्यकपदार्थयोविशेषणविशेष्ययोर्भेदस्त
योर्हृद्दापवादकोनत्वेकपदार्थयोरेवविशेषणविशेष्ययोर्भेदइतिनायंपंथाः। धर्मपरतय
तेति। नपुंसकेभावेक्तइत्यनुशासनाद्व्याप्तिर्विशिष्यमेवव्याप्तिविशिष्टशक्त्यर्थस्तथाचव्याप्तिवि
शिष्टपदपक्षधर्मतापदयोर्हृद्दइतिभावः। एतेनवैशिष्ट्यशक्तधातूत्तरक्तप्रत्ययस्याश्रया
श्रयस्थापकस्याश्रयत्वलक्षणांगांव्याप्तिर्वैशिष्ट्याश्रयत्वापस्थितौव्याप्तिर्वैशिष्ट्याश्रय
त्वपक्षधर्मत्वज्ञानजन्यत्वमर्थः। स्यात्तथाचव्याप्यवानितिपरामर्शस्यसंबंधसंबंधिप

यकत्वानुसेवाव्याप्तिरितिपरास्तंएवमपिएकत्रधर्मिणीतिविशेषणेपिमीमांसकेति। तथाचव्या
प्यवानितिशब्दपरामर्शस्थलीयानुमित्यव्याप्तिः।धूमत्वावच्छिन्नव्याप्तिवैशिष्ट्यज्ञानंधू
मत्वावच्छिन्नपक्षधर्मताज्ञानंचकारणमितिकारणतालाघवंगृह्यमाणाव्या
प्यवृत्तिएकधर्मप्रकारकपक्षधर्मताज्ञानत्वेनहेतुत्वेकोचतत्कालानुपस्थितत्वपुरुषीयत्व
प्रवेशादनंतकार्य्यकारणभावापत्तिरितिमिथइतितदुभयंव्याप्तिविशिष्टएकपक्षधर्म
त्वाभयंउपश्लेषःपरस्परसामानाधिकरण्यं।अव्याप्यवृत्तेत्वात्व्याप्यवानितिपरामर्शतद
संभवादित्यर्थः।नचतदुभयेति।तदुभयकत्वनियतधर्मःपरामर्शत्वपरामर्शप्रयत्वपरामर्
शत्वेनहेतुतायांमानाभावादित्याशयः।नचतत्प्रयत्नत्वेनहेतुत्वात्वह्निव्याप्यधू २४

माद्रव्यंपर्वतवृत्तीत्यादिज्ञानप्रत्यक्षेऽतिव्याप्तिरेवेतिवाच्यंअनेकवृत्तित्वेनधर्मस्यविशेष
णात्तत्रशक्तिग्रहस्यैकमात्रवृत्तित्वात्।विषयस्यतत्त्वेनकारणत्वंनास्तीत्याशयेनद
मितिकश्चित्पक्षधर्मतातिपक्षधर्मताविषयत्वनियतधर्मावच्छिन्नइत्यकोचपक्ष
धर्मतायाःपर्वतसंयोगादिरूपतयाधूमधूमाभावसहचरितवह्निमान्पर्वतइत्ये
वमानकारकज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयपर्वतोधूमवान्नवेति
संशयेतिव्याप्तिःस्यादतस्तद्वारणायव्याप्तिविषयकत्वमावश्यकमेवमपिधूमव्या
प्यधूमव्याप्याभावसहचरितवह्निमानित्येवंरूपसारधारणधूमवद्भूमिज्ञानजन्य
पर्वतोधूमव्याप्यवान्नवेतिसंशयेऽतिव्याप्तिरितिवाच्यंपक्षधर्मताविषयकत्वदले

नापितदवारणात्।तथाचव्याप्तिविषयकत्वदलस्यसंशयविशेषातिव्याप्तिवारकतयाव्याव
र्तकत्वमस्तिनतुपक्षधर्मतापदस्यतयाशयाद्वतपर्वतसंयोगप्रत्यक्षसंबंधितावच्छेदकधू
मप्रकारकपर्वतज्ञानत्वनहेतुत्वात्तत्रातिव्याप्तिरतःपक्षधर्मतापदोपादानवैयर्थ्यमुक्त
मित्यपिकश्चित्।व्याप्तिज्ञानत्वपरामर्शत्वावच्छिन्नकारणतादृष्ट्येलाघवव्याप्तिविषयक
त्वनियतत्वंविकाशकतयाऽउक्तमित्यवस्तुतस्तुपक्षधर्मताविषयकत्वनियतत्वपाद
नंधूमवान्पर्वतोनास्तीत्यभावलौकिकप्रत्यक्षप्रतियोगितावच्छेदकधूमप्रकारकज्ञो
नजन्येऽतिव्याप्तिरतोव्याप्तिविषयकत्वावश्यकं।नचतथापिवह्निव्याप्योधूमोना
स्तीत्यभावप्रत्यक्षेऽतिव्याप्तिरितिवाच्यं।निकृष्टमतेव्याप्तेरतीन्द्रियतयातदवच्छिन्न

अभावस्यापिअतीन्द्रियत्वात्तत्रतेनरूपेणहेतुत्वात्।अभावलौकिकप्रत्यक्षंप्रत्येवतथाहेतुत्वात्
एवंव्याप्तिपदस्याभावमात्रपरत्वअभावप्रत्वनियतधर्मावच्छिन्नकारणतानिरूपितप्रतियोगिक
कार्यतानिरूपितत्वविवक्षणेऽनुमितिमात्रएकलक्षणंयाति।परंतुस्थलविशेषेऽतिव्याप्तिर्भ
वतिपक्षधर्मतापदानत्वव्याप्तिरितिव्याप्तिश्चेत्यतापिपक्षधर्मतापदानवैयर्थ्यमुक्तमि
तिध्येयं।वस्तुतस्तु।विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणायव्याप्त्यविषयकत्वेन
ज्ञानंविशेषणीयमितिवक्ष्यतितथाच•पक्षधर्मताविषयकत्वनियतयादृविवक्ष
णेधूमवत्पर्वतवानितिविशिष्टवैशिष्ट्यबोधेव्याप्त्यविषयकअतिव्याप्तिरतोव्या
प्तिविषयकत्वादृपदमावश्यकं।नचपक्षधर्मतापदमुपादायतत्रयक्षधर्मत्वाविषय

तापिवह्निनिष्ठपक्षधर्मताविषयकत्वात्।हेतुतावच्छेदकरूपेणापक्षधर्मताविषयकत्वेनोच्चवह्नि२
कत्वेनैवजन्यंज्ञानंविशेष्यतां।तावतापिविशिष्टेवशिष्यबोधादवतिव्याप्तिवारणसंभवा
दितिवाच्यं।तथासत्यसंभवापत्तेः।पर्वतोवह्निव्याप्यवत्पर्वतवानितिविशिष्टेवशिष्यबो
धेतिव्याप्तिः।व्याप्तिप्रकारकपक्षधर्मताविषयकत्वेनोच्चव्याप्यविषयत्वस्यैवलाभेन
निवक्षणोचित्यादितिसारव्याप्तिविशिष्टपक्षधर्मताज्ञानपदयोःकर्मधारयःवि
शिष्टैवप्रकारकपरमित्याशयेनाहव्याप्तीति।यद्यपिवह्निव्याप्योधूमःदृश्यवान्पर्वतइति
ज्ञानस्यापिव्याप्तिप्रकारकत्वात्पक्षधर्मताज्ञानत्वाच्चतज्जन्यानुव्यवसायेऽतिव्याप्तिः।।
उक्तरूपेणजनकत्वेनोच्चासंभवएव।वह्निव्याप्योधूमोधूमवान्पर्वतइतिज्ञानसाधारण
त्वात्।तथापि।पक्षधर्मतांशेव्याप्तिप्रकारकत्वंविवक्षितंतच्चपक्षनिष्ठविशेष्यतानिरूपि २६

तप्रकारतावच्छिन्नव्याप्तिप्रकारतावत्त्वं।धूमावह्निव्याप्योधूमवान्पर्वतइत्यत्रपर्वतविशेष्यतानिरू
पिताधूमनिष्ठप्रकारतानव्याप्तिप्रकारतावच्छेदिका।किंतु।धूमस्यमुख्यविशेष्यतवतिनतसा
धारणेमितिध्येयम्।अत्रापितादृविवक्षणेपिवह्निव्याप्येंधनवानित्युक्तोवह्निभिन्नवृत्ति
रूपव्याप्तिप्रकारकत्वसंभवान्नस्यादतोविशिष्याह।इंधनसमानाधिकरणेति।भ्रमानुमिते
रिति।पूर्वभ्रमात्मकपरामर्शजन्यायांविषयाबाधेनप्रमानुमितावव्याप्तिर्दुरितिभावः।व
त्त्वनियामकसंयोगेनसाध्यतायांहेतुतायांचआकाशानुमितिःपरामर्शभ्रमेवस्यादतो
वृत्तिनियामकसंबंधेनहेतुतासाध्यतापरंसपक्षस्यर्थमाह।अत्रेतिसप्तम्याआधेयत्वप्रति
पादनात्।नितरामिति।साध्येव्यापकत्वप्रकारकंसाधनेचसाध्यसामानाधिकरण्य

ति

प्रकारकमित्यंव्याप्तिप्रकारकत्वोक्तौपूर्वव्याप्तिर्निरासात्।अत्रतुव्यापकत्वसामानाधिकर
ण्ययोरप्यप्रसिद्धाव्याप्तिवारणंनसंभवतीतिभावः।तथाऽव्याप्तिः।तावत्सदार्थीनांव्य
क्तिशरीरनिविष्टपदानांथैतथाविधेतिव्याप्तिमान्।यत्रयस्ययेनसंबंधेनप्रकारतात
त्रैतेनसंबंधेनतत्प्रकारकत्वमित्यर्थः।तच्चाधिकरणहेतुप्रकारकंअभावतादृशाधिक
रणवृत्तित्वप्रकारकप्रतियोगितायांतादृशभावप्रकारकमित्यस्त्रिमणेबोध्यं।नचव्य
तिरिक्तीतितत्रपक्षधर्मतांशेवह्नभावव्यापकीभूताभावप्रतियोगिधूमत्वस्यवप्रका
रत्वादितिभावः।ननुधूमव्यापकवह्निसमानाधिकरणधूमत्वस्यवह्नभावव्यापकीभू
ताभावप्रतियोगिधूमत्वेस्यचज्ञानंवह्नभाववहृत्तित्वरूपव्याप्तिचाधियंप्रतिग्राह्यभा २७

वावगाहितयातच्चाप्यवगाहित्वेनवाऽपिरोध्यतआह।भवतीति।तथाचातथाभूतस्याप्य
नाद्येवमणिमंत्रादिन्यायेनप्रतिबंधकत्वंकल्प्यतइतिभावः।ननुधूमव्यापकेवह्निसा
मानाधिकरणधूमसमानाधिकरणरासभवानितिज्ञानेधूमसमानाधिकरणत्वेनाभा
वप्रतियोगितानेवच्छेदकवह्निवत्वानितिज्ञानेचवह्न्यभाववहृत्तिधूमइतिव्यभिचार
धीविरोधित्वसत्वात्तज्जन्यप्रत्यक्षेऽतिव्याप्तिः।उक्तरूपजनकत्वविवक्षणेत्वसंभवएव
उक्तरूपस्यतादृशधूमसमानाधिकरणरासभवानितिज्ञानसाधारणतयाजनकत
नवच्छेदकत्वातेदंआह।तथाविधेति।नतथा।नपक्षधर्मतांशेव्यभिचारधीविरोधिधी
विषयःरासभादावितितथाचतद्धिशिष्टव्यभिचारधीविरोधिधीविषयधर्मप्रकारक

तद्विशिष्टवह्यप्रसिद्धधर्मताज्ञानजन्यत्वमर्थः। उक्तज्ञानंतुपक्षधर्मतयाज्ञातयासमत्वविशिष्टव्यभिचाराधीविरोधिधूमत्वविशिष्टतथात्वेपितस्यनपक्षधर्मतयाभानमितिभावः। ननुधूमसामानाधिकरण्येव्याप्तावावाक्रूपव्यभिचाराधीविरोधित्वमनाभावः। कथंव्यतिरेकव्याप्तौनचवह्नित्वंधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकधूमाभावत्वंवक्तव्यमानसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्यवसन्नूहालघनात्। व्यभिचाराधीविरोधित्वंवाच्यं। तथापिधूमव्यापकवह्निकालीनधूमवान्पर्वतइतिज्ञानस्यसमानाधिकरण्यविषयतयाऽनुमित्यजनकस्यसंग्राहकतयाक्रूपस्यानुमितिजनकज्ञानावच्छेदकत्वात्। नचधूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वतःवह्न्यभाव २८

पकाभावप्रतियोगिधूमवान्पर्वतइतिज्ञानयोरन्यतरत्वमेवचहेतुतावच्छेदकमतस्तत्रैवलाघवमितिवाच्यं। अन्यतरत्वघटकभेदानांविशेषणविशेष्यभावविनिगमनाविरहेणानानाकार्यकारणभावावश्यकत्वेतदपेक्षयालाघवासंभवरूपेणवहेतुत्वकल्पनान्यायत्वादतआह। व्यतिरेकसहचारेणेति। ननुमणिमंत्रादिन्यायेनप्रतिबंधकत्वमानभावःकोविलक्षोन्वयव्यतिरेकानुविधानस्यातादृश्यभिचाराधुत्रायकत्वेनाप्युपयोगादित्यस्वरसादाहव्यतिरेकसहचारेणेतिकश्चित्०भ्रमसंशयोत्तरंतिअत्रभ्रमसंशययोर्विपरीतज्ञानत्वेनानुगमः। विपरीतंव्यावर्त्तकमात्रंतेनस्थाणुत्वभ्रमोत्तरस्यपुरुषत्वाभावभ्रमोत्तरस्यचपुरुषत्वस्यसत्यनासंग्रहः। तदुत्तरत्वंवाच्यं

वहितोत्तरत्वसंबंधेनतादृशविपरीतज्ञानवत्प्रत्यक्षनिर्णयत्वंतेनाव्यवहितोत्तरत्वस्यतत्तथोक्ति
विश्रांतत्वेपिनक्षतिः। नवातसंशयोत्तरसंशयेव्यभिचारइति उपाध्यायमतंतन्निर्णयंप्रति
तद्भावज्ञानत्वेनविरोधितात्तत्रचप्रामाण्यनिर्णयस्यैवविशेषदर्शनादरप्युत्तेजकत्वं
एवंव्यंजकाग्रहांधकारकालीनतत्संशयोत्तरतन्निर्णयंव्यंजकग्रहालोकसमवधानानां
मप्युत्तेजकत्ववाच्यंनचैवंयत्रपर्वतोवह्निमान्नवेतिसंशयानंतरंवह्निव्याप्यधूमवान्
पर्वतःभाविवह्न्यभाववानितिलौकिकप्रत्यक्षात्तत्रापेक्षाबुद्ध्यात्मकस्ययःपरामर्शःनपुनरनु
मित्यापत्तिः। एवमंधकारस्थघटसंशयानंतरमालोकसमवधानेघटनिर्णयानंतरपुन
र्विशेषादर्शनप्रयुक्तघटसंशयानंतरंविनैवविशेषदर्शनंघटनिर्णयापत्तिः। पूर्वोत्तेजक

नुमितिरप्रमे तिसमूहालंबनात्मकापेक्षाबुद्ध्यात्मकश्चयमानसपरामर्शःततःपर्वतोवह्निमानित्यनुमिति

ततपर्वतोवह्न्यभा
वज्ञान२

स्यत्रालोकसमवधानस्यसत्वात्। अतिवाच्यंतत्तत्कालावच्छिन्नविशेषदर्शनाद्यभावविशिष्ट
तद्विपरीतज्ञानाभावत्वेनतन्निर्णयंप्रावच्छिन्नंप्रतिहेतुत्वादिति। वाधनिश्चयस्यत्वतंत्र
तोहेतुप्रतिबंधकतयातुविशेषदर्शनंतत्कालावच्छिन्नत्वेनदृश्यं। स्वमतसंशयोत्तरप्रत्यक्ष
स्यावच्छिन्नंप्रतिविशेषदर्शनस्यनहेतुत्वंअंधकारस्थघटसंशयोत्तरप्रत्यक्षव्यभिचा
रात्। नचतादृविपरीतज्ञानविरोधित्वंनहेतुता। विशेषदर्शनालोकादिसाधारणविरो
धितस्यैकस्याभावात्। किंच। विशेषादर्शनप्रयुक्तसंशयानंतरआलोकसमवधान
स्यपुनरंधकारस्थघटसंशयविरोधिनःसत्वात्तत्प्रत्यक्षापत्तिः। तस्मादृशीयतादृ
शविपरीतज्ञानोत्तरप्रत्यक्षंप्रतितत्पुरुषीयतादृशविपरीतज्ञानविरोधित्वंनहेतुत्वस्य

कोचातावगौरवं। पुरुषांतरीयविशेषदर्शनस्यापितादृशविरोधिस्वरूपयोग्यत्वादतिप्रसं
गः। एवंतादृशविपरीतज्ञानवस्त्रनिर्णायत्वेनकार्यतावच्छेदकं। अर्थसमाजग्रस्तत्वात्॥
किंच। भ्रमसंशयानंतरनिर्णायसामान्यसामग्रीस्वभ्रमसंशयोत्तरमपिसामान्यनिर्णायाप
त्तिदुर्वारेतितदनुत्तरप्रत्यक्षेपिसामग्यंतरकल्पनेऽतीगौरवंएवंचविशेषदर्शनमितर
कोटिज्ञानविरोधितयासंशयोत्तरतादृप्रत्यक्षेउपयुज्यतइत्यभिसंधायाह०हेतुतामत
इतिनचसर्वमतएवविशेषदर्शनस्यविशेषणधीत्वेनहेतुत्वात्। हेतुतामतइतिनयु
क्तंविशेषदर्शनत्वेनवतस्यहेतुतयापरामर्शत्वेनहेतुत्वविवक्षणेपितत्राव्याप्ति
रितिपूर्वपक्षिणाआशयात्। विशेषणधियाहेतुत्वेमिप्रायेणादमित्यपिकश्चित्॥ ॥ ३०।

तथाविधेति॥ व्याप्तिप्रकारपक्षधर्मतानिश्चयत्वेनेत्यर्थः। भ्रमादीति। अन्यथाव्यावर्त्तकधर्मादृ
शनव्यंजकधर्मदर्शनालोकादिसाधारण्याभावेनव्यभिचारप्रसंगादिति। श्वेत्यव्याप्यशंखत्व
वानयमितिदर्शनंचनाशयभ्रमविरोधीतिनततः श्वेत्यप्रत्यक्षाकेचित्तु। विशेषदर्शनाद्यतिरिक्त
यावत्कारणकालीनतादृशसंशयोत्तरप्रत्यक्षंप्रतितादृशसंशयविरोधिदर्शनत्वेनव्याव
र्त्तकधर्मदर्शनादिसाधारणरूपेणहेतुताआलोकाभावप्रयुक्तसंशयोत्तरप्रत्यक्षेआलो
कसमवधानंहेतुरित्याहुः। अतएव० तथाविधेतिनिश्चयत्वेनहेतुत्वेनविवक्षणादेवलिंगव
चादिकंलक्षणस्वरूपंयस्येवंभूतोयोऽतिदेशवाक्यार्थस्तस्ययद्वानंवह्निव्याप्यधूम
वत्पर्वतसदृशंमहानसपदवाच्येमिस्याकारकंतज्जन्याध्ययामित्यर्थः। तथाविधेति।

THE ASIATIC SOCIETY OF BOMBAY

धूमवत्पर्वतसादृश्यविशिष्टमहानसपदवाच्यत्वज्ञानत्वेनेत्यर्थः। न्यायार्थेति। पंचावयवेरेकवाक्य
तयावाघोजातइतिचिंतामणिकाररीत्याऽदृष्टमुक्त्वमतरूपनयार्थविशेष्यकनिगमनार्थविशेष
णाकशाब्दबोधेऽतिव्याप्तिर्बोध्या। ननूपनयेनवह्निव्याप्यधूमस्यपर्वतसामानाधिकरण्यप्रकारतया
भानंकिंतुमतुवर्थसंबंधिनोऽभेदसंबंधेनप्रकारतयाभानोमिति। तादृशनिश्चयत्वेनहेतुत्व
विवक्षयैवतत्रनातिव्याप्तिः। तथाचायमियत्पनयोमद्वएवेत्यतआह। तच्छब्देनेति। यत्रव
ह्निव्याप्यधूमवत्पर्वतमेवबुद्धिस्थात्कृत्यमास्तीतिशब्दाभिहितस्तत्रवह्निव्याप्यधूमव
त्पर्वतोपस्थित्यतऊर्ध्वंवह्निव्याप्यधूमवान्पर्वतोऽस्तीतिशाब्दबोधेतिव्याप्तिः। ननुतच्छ
ब्देनबुद्धिस्थत्वेनवोपस्थितिः। शाब्दबोधश्चविशेषधर्मप्रकारकधीमानसीज्ञातिर्नतत्रेति ३१

प्रसंगाइत्यत आह। संकेतेति। यत्रवह्निव्याप्यधूमवत्पर्वतएवघटपदस्यसंकेतग्रहश्चास्तीति
वाक्येनवह्निव्याप्यधूमवान्पर्वतोऽस्तीतिबोधोजनितस्तत्रातिव्याप्तिरित्यर्थः। ननुमाहावाक्य
ार्थज्ञानंनावांतरवाक्यार्थज्ञानजन्यमतःकथंन्यायार्थज्ञानेतिव्याप्तिरतआह। यस्मादित्यप
ेक्षितिपदजन्यत्वस्येति। घटादिपदादाश्रयत्वादिसंबंधनाकाशोपस्थितावपिशाब्दबोधानु
दयात्। वृत्त्यापदजन्यपदार्थोपस्थितित्वेनवहेतुत्वंवृत्त्यास्वजन्यघटोपस्थितेहेतुत्वाभ्यु
पगमात्। ननुपटशाब्दबोधंप्रतिवृत्त्याघटोपस्थापकपदज्ञानत्वेनकारणाता। वृत्त्यास्वजन्यपटोप
स्थितिःव्यापारःव्यापारस्यहेतुताचघटत्वप्रकारकज्ञानत्वेनावच्छिद्यते। नचैवप्रत्यक्षोप
स्थितेघटेघटोपस्थितिव्यापारकपटपदज्ञानसतिघटशाब्दबोधापत्तिः। घटशाब्दबोध

टापस्थितेरजनकत्वेनाव्यापारत्वात्। नचैवमपिचटपदजन्यचटोपस्थितौसत्यांप्रकारांतरेणचटोपस्थितेरपिशाब्दबोधजनकत्वापत्तिरिष्टत्वात्। पदजन्यपदार्थोपस्थित्यभावकालेशाब्दबोधानुदयस्यतावतापुपपन्नत्वात्तथाचपदार्थोपस्थितेर्हेतुतायांपदजन्यत्वप्रवेशात्। तथैवाव्याप्तिरतआह॰ निश्चयत्वस्येति। उद्बोधकविषयीपदजन्यपदार्थोपस्थितत्वव्यापारत्वेनतत्स्मरणरूपतयाशाब्दबोधरूपतयावानिश्चयोभिन्नत्वासंभवेनतद्वारणायसशब्दान्यज्ञानत्वस्यचप्रवेशानर्थक्यादितिभावः। केचित्। पदार्थोपस्थितिकारणतायांपदजन्यत्वमधिकंनिविष्टंनिश्चयत्वंचानिविष्टमित्यतिव्याप्तिरयंतासंभवप्रदर्शनार्थमिदमित्याहुः। तथापि। पदार्थोपस्थितिकारणतामादायातिव्याप्तिवारणेपि ३२

